শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥ শ্রীমন্নারাযণীযে ষটষষ্টিতমং দশকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীমন্নারাযণীযে ষটষষ্টিতমং দশকম্ ॥

## গোপীজনাহ্লাদনৱর্ণনম্

উপযাতানাং সুদৃশাং
  কুসুমাযুধবাণপাতৱিৱশানাম্।
অভিৱাঞ্ছিতং ৱিধাতুং
  কৃতমতিরপি তা জগাথ ৱামমিৱ ॥ **66.1** ॥

গগনগতং মুনিনিৱহং
  শ্রাৱযিতুং জগিথ কুলৱধূধর্ম্মম্।
ধর্ম্যং খলু তে ৱচনং
  কর্ম তু নো নির্মলস্য ৱিশ্ৱাস্যম্ ॥ **66.2** ॥

আকর্ণ্য তে প্রতীপাং
  ৱাণীমেণীদৃশঃ পরং দীনাঃ।
মা মা করুণাসিন্ধো
  পরিত্যজেত্যতিচিরং ৱিলেপুস্তাঃ ॥ **66.3** ॥

তাসাং রুদিতৈর্লপিতৈঃ
  করুণাকুলমানসো মুরারে ৎৱম্।
তাভিস্সমং প্রৱৃত্তো
  যমুনাপুলিনেষু কামমভিরন্তুম্ ॥ **66.4** ॥

চন্দ্রকরস্যন্দলস -
  ৎসুন্দরযমুনাতটান্তৱীথীষু।

গোপীজনোত্তরীযৈ -
    রাপাদিতসংস্তরো ন্যষীদস্ত্বম্॥ **66.5**॥

সুমধুরনর্মালপনৈঃ
    করসঙ্গ্রহণৈশ্চ চুম্বনোল্লাসৈঃ।
গাঢালিঙ্গনসঙ্গৈ -
    স্ত্বমঙ্গনালোকমাকুলীচকৃষে॥ **66.6**॥

ৱাসোহরণদিনে য -
    দ্বাসোহরণং প্রতিশ্রুতং তাসাম্।
তদপি ৱিভো রসৱিৱশ -
    স্বান্তানাং কান্ত সুভ্রুৱামদধাঃ॥ **66.7**॥

কন্দলিতঘর্মলেশং
    কুন্দমৃদুস্মেরৱক্ত্রপাথোজম্।
নন্দসুত ৎৱাং ত্রিজগৎ -
    সুন্দরমুপগূহ্য নন্দিতা বালাঃ॥ **66.8**॥

ৱিরহেষ্ৱঙ্গারমযঃ
    শৃঙ্গারমযশ্চ সঙ্গমে হি ৎৱম্।
নিতরামঙ্গারময -
    স্তত্র পুনস্সঙ্গমেঽপি চিত্রমিদম্॥ **66.9**॥

রাধাতুঙ্গপযোধর -
    সাধুপরীরম্ভলোলুপাত্মানম্।
আরাধযে ভৱন্তং
    পৱনপুরাধীশ শমায সকলগদান্॥ **66.10**॥

॥ ইতি শ্রীমন্নারাযণীযে ষটষষ্টিতমং দশকং সমাপ্তম্॥